# १८ - जन्मदिनम् ।

शुभचिन्तनमस्तु अद्य जन्मदिने ते।
नृत्यामः गायामः जन्मदिने ते ।।ध्रु।।

दिने दिने वर्धस्व प्राप्नुहि यशः।
तव मार्गे अस्तु सदा धवलप्रकाशः।
आशीर्युतहस्तो मे अस्तु मस्तके ।।१।।

सर्वेषाम् अद्याशीः सुखं प्राप्नुहि।
सद्‍गुणसम्पत् लसतु सर्वदा त्वयि।
अभिनन्दनमस्तु अद्य जन्मदिने ते ।।२।।

आयुष्मन् शतं जीव चिरं जीव रे।
लोकमित्रमिति कीर्तिः तव सदास्तु रे।
निरामयं निर्व्याजं हसितमस्तु ते ।।३।।





# ३० - चतुरः काकः।



अस्ति एकः काकः।
स काकः तृषितः भवति।
स काकः अत्र पश्यति।
अत्र जलं नास्ति।



स काकः तत्र पश्यति।
तत्र जलं नास्ति।
स इतस्ततः भ्रमति।
स एकं घटं पश्यति।



घटे जलम् अस्ति।
परन्तु जलं स्तोकम् अस्ति।
स काकः चिन्तयति।
"किं करोमि? भवतु। एवं करोमि।"



स चञ्च्वा पाषाणखण्डं धरति।
उड्डयमानः पाषाणखण्डम्
आनीय घटे क्षिपति।
एवं स वारंवारं करोति।



घटे जलम् उद्गच्छति।
काकः जलं पिबति।
काकः सन्तुष्टः भवति।
काकः उड्डीय दूरं याति।